C

Roll No. ..........................

Total No. of Pages : 4

Total No. of Questions : 9

उत्तरमध्यमा द्वितीयखण्ड

**विषय कोड : 815**

# दर्शनम्

## पञ्चमं प्रश्नपत्रम्

**समय : 3 घण्टे** **पूर्णांक : 100**

**निर्देश : सर्वे** प्रश्ना: समाधेया: ।

1. निम्नाङ्कितेषु समुचितं विकल्पं चिनुत— 5×1=5

(क) प्राचीन न्यायदर्शने पदार्था: प्रतिपादिता: सन्ति-

(*i*) द्वादश (*ii*) चतुर्दश

(*iii*) षोडश (*iv*) अष्टादश

(ख) महर्षिगौतमस्य अपरं नाम वर्तते-

(*i*) लोभपाद: (*ii*) अक्षपाद:

(*iii*) वामपाद: (*iv*) दक्षिणपाद:

(ग) महर्षिगौतमस्य धर्मपत्नी कथ्यते-

(*i*) अहिल्या (*ii*) तारा

(*iii*) शकुन्तला (*iv*) चित्रलेखा

(घ) पदार्थशास्त्रम् उच्यते-

(*i*) न्यायवैशेषिकम् (*ii*) सांख्ययोग:

(*iii*) पूर्वोत्तरमीमांसा (*iv*) व्याकरणसाहित्यम्

(ङ) औलूक्यदर्शनं कथ्यते-

(*i*) सांख्यदर्शनम् (*ii*) योगदर्शनम्

(*iii*) न्यायदर्शनम् (*iv*) वैशेषिकदर्शनम्

2. रिक्तस्थानस्य पूर्तिः कार्या- 5×1=5

(क) सप्तपदार्थाः ............ कथिताः सन्ति। (न्याये/वैशेषिके/योगे/सांख्ये)

(ख) अनुमानं .......... भवति। (द्विधा/चतुर्धा)

(ग) न्यायदर्शनेऽवयवाः ........ सन्ति। (त्रयः/चत्वारः/पञ्च/षट्)

(घ) हेत्वाभासाः ............ सन्ति। (पञ्च/दश/द्वादश/पञ्चदश)

(ङ) 'वह्निरुष्णः' इति वाक्यम् अस्ति .........। (प्रतिज्ञा/हेतुः/उदाहरणम्/उपनयः)

3. निम्नाङ्कितानां समुचितं युग्मं मेलयत- 5×1=5

| | |
|---|---|
| (क) उपमितिकरणम् | 1. तदुपमितिः । |
| (ख) सादृश्य धीः | 2. शब्दः कथ्यते। |
| (ग) गवयो गवय पदवाच्य इति ज्ञानं यज्जायते | 3. शक्तिधीः सहकारिणी। |
| (घ) आप्तवाक्यमिति | 4. गवादीनाम्। |
| (ङ) शाब्दबोधः फलं तत्र | 5. उपमानं भवति। |

4. निम्नाङ्कितेषु सत्यं/असत्यं वा लिखत– 5×1=5

(क) वेदान्तो नाम उपनिषत् प्रमाणम्। (सत्यम्/असत्यम्)

(ख) श्वेताश्वतरोपनिषत् कृष्णयजुर्वेदीया वर्तते। (सत्यम्/असत्यम्)

(ग) श्वेताश्वतरोपनिषदि षड् अध्यायाः सन्ति। (सत्यम्/असत्यम्)

(घ) श्वेताश्वतरोपनिषदि 'शिक्षावल्ली' अस्ति। (सत्यम्/असत्यम्)

(ङ) 'ओम् सह नाववतु' इति मन्त्रः श्वेताश्वतरोपनिषदो गृह्यते। (सत्यम्/असत्यम्)

5. निम्नाङ्कितानां पदविच्छेदं कुरुत- 5×1=5

(क) <u>ब्रह्मोडुपेन</u> प्रतरेत।

(ख) <u>ज्ञात्वाऽमृता</u> भवन्ति।

(ग) <u>विश्वस्यैकं</u> परिवेष्टितारम्।

(घ) विकुर्वन्नस्मिन् क्षेत्रे।

(ङ) केवलो <u>निर्गुणश्च</u>।

6. अधोलिखितानामुत्तराणि देयानि- 10×2=20

(क) आस्तिकदर्शनानां नामानि लिखत।

(ख) सप्तपदार्थानां नामानि लिखत।

(ग) अनुमानस्य अवयवाः लेख्याः।

(घ) हेत्वाभासानां नामानि लिखत।

(ङ) 'व्यापारस्तु परामर्शः' – इति कारिकां पूरयत।

(च) 'वाक्यार्थस्यातिदेशस्य– 'इति कारिका पूरणीया।

(छ) 'सह नाववतु...०' इति मन्त्रं पूरणीयः।

(ज) 'पुरुष एवेदꣳ...०' इति मन्त्रं पूरयत।

(झ) 'य एकोऽवर्णो वहुधा...०' पद्यमिति पूरणीयम्।

(ञ) 'स्वभावमेके कवयो...०' इति श्लोकं पूरयत।

7. अधस्तनानां विवेचना कार्या- 4×5=20

(क) न्यायवैशेषिकदर्शनयोः प्रतिपाद्यविषयं लिखत।

(ख) निम्नाङ्कितकारिकासु **तिस्रो** व्याख्येयाः–

(1) अथवा हेतुमन्निष्ठविरहा प्रतियोगिना।

साध्येन हेतौरैकाधिकरण्यं व्याप्तिरुच्यते॥

(2) आद्य: साधारणस्तु स्यादसाधारणकोऽपर:।

तथैवानुपसंहारी त्रिधाऽनैकान्तिको भवेत्॥

(3) ग्रामीणस्य प्रथमत: पश्यतो गवयादिकम्।

सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्॥

(4) पदज्ञानं तु करणं द्वारं तत्र पदार्थधी:।

शाब्दबोध: फलं तत्र शक्तिधी: सहकारिणी॥

8. अधस्तनेषु पद्येषु केषाञ्चित् **पञ्चानां** सान्वय व्याख्या कार्या- 5×5=25

(1) काल: स्वभावो नियतिर्यदृच्छा भूतानि योनि: पुरुष इति चिन्त्यम्।

संयोग एषां नत्वात्मभावादात्माप्यनीश: सुखदु:खहेतो:॥

(2) यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश।

य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नम:॥

(3) वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात्।

जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यम्॥

(4) मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।

तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥

(5) नैव स्त्री न पुमानेष न चैवायं नपुंसक:।

यच्छरीरमादन्ते तेन तेन स युज्यते॥

(6) एको देव: सर्वभूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मा।

कर्माध्यक्ष: सर्वभूताधिवास: साक्षी चेता केवलो निर्गुणश्च॥

9. शक्तिग्रहस्तु व्याकरणादित: कथं भवतीति विस्तरेण विविच्यताम्। 10